This Question Paper consists 42 questions and 8 printed pages.
अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति ।

Roll No. | | | | | | | | | | | | |
अनुक्रमाङ्कः

Code No. 60/S/A
कूट सं.
Set - A

# SANSKRIT
# संस्कृतम्
# (209)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ______________________

Signature of Invigilators 1. ______________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ______________________

सामान्य अनुदेशाः :

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

3 वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

4 वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

5 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

6 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **60/S/A - A** अवश्यं लेखनीया ।

# SANSKRIT
# संस्कृतम्
# (209)

समयः होरात्रयम्] [पूर्णाङ्काः : **100**

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति ।

**(2)** प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

**खण्ड – क**

**1** योगेन किं रक्ष्यते ? **1**

(A) सत्यम् (B) धर्मः

(C) विद्या (D) कुलम्

**2** शुनः कति गुणाः ज्ञातव्याः ? **1**

(A) त्रयः (B) चत्वारः

(C) पञ्च (D) षट्

**3** भरतः रामं प्रसादयितुम् कुत्र आगतः ? **1**

(A) चित्रकूटे (B) भरद्वाजाश्रमे

(C) गंगातटे (D) अयोध्यायाम्

**4** वासरान्ते किं पिबेत् ? **1**

(A) तक्रं (B) पयः

(C) वारि (D) उष्णजलम्

**5** स्वाध्यायाभ्यसनं कीदृशं तप उच्यते ? **1**

(A) सात्विकम् (B) राजसम्

(C) शारीरम् (D) वाङ्मयम्

**6** 'बोपदेवः शिलाखण्डे किम् अपश्यत ?' अत्र रेखांकित पदे का विभक्तिः ? **1**

(A) प्रथमा (B) तृतीया

(C) सप्तमी (D) पञ्चमी

7 'कार्याणि उद्योगेन सिध्यन्ति' इत्यत्र 'कार्याणि' पदस्य कः मूलशब्दः ? 1

(A) क्रिया (B) कार्य

(C) कर्म (D) कारि

8 'दैत्यानामधिपः शक्रः <u>अभवत्</u>' अत्र अभवत् क्रियापदे कः लकारः ? 1

(A) लट् (B) लोट्

(C) लङ् (D) लृट्

9 'दौवारिकः <u>संन्यासिनं</u> दुर्गाध्यक्षस्य समीपे नेतुम् इच्छति ।' अत्र रेखांकित पदे कः मूलशब्दः ? 1

(A) संन्यस् (B) संन्यासिन्

(C) संन्यास् (D) संन्यासी

10 मत्स्यौ किं त्यक्त्वा अन्यत्र गतौ ? 1

(A) ग्रामं (B) वनं

(C) ह्रदं (D) परिवारम्

11 वृक्षेभ्यः कं शिक्षाद्वयं गृह्णीयात् ? 1+1=2

12 (i) भास्कराचार्यस्य जन्म कस्यां शताब्द्याम् अभवत् ? 1+1=2

(ii) भुवः परिधिः कियान् वर्तते ?

13 (i) कयोरपि द्वयोः ज्योतिर्विदोः नामानि लिखत । 1+1=2

(ii) रामेण कस्य वधार्थं समयः कृतः ?

14 अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत – 1×3=3

कण्वः – वत्से ! अलं रुदितेन । स्थिराभव । इतः पन्थानम् आलोकय । अस्मिन नतोन्नतमार्गे ते पदानि विषमीभवन्ति ।

शर्ङ्गरवः – भगवन् ! ओदकान्तं स्निग्धोजनोऽनुगन्तव्य इति श्रूयते । तदिदं सरस्तीरम्, अत्र सन्दिश्य प्रतिगन्तुमर्हति भवान् ।

कण्वः – शकुन्तले ! त्वं गुरुन् शुश्रूषस्व, परिजनेषु बाहुल्येन उदाराभव । समृद्धिषु अगर्विता भव । एवं आचरन्त्यः युवतयः गृहिणीपदं यान्ति ।

गौतमी – जाते ! एतत् खलु सर्वम् अवधारय ।

शकुन्तला – तात ! कथम् उन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि । (पादयोः पतति)

**प्रश्नाः –**

(i) पदानि कुत्र विषमी भवन्ति ?

(ii) कण्वः शकुन्तलां समृद्धिषु कीदृशी भवितुम् आशीर्वदति ?

(iii) उन्मूलिता चन्दनलता इव का अस्ति ?

15 अधोलिखितयोरेकस्य चरित्रचित्रणं पंचवाक्येषु संस्कृतेन कुरुत – 1×5=5

शक्ररूपः बोधिसत्त्वः **अथवा** दौवारिकः

16 प्रश्नान् उत्तरत – 1+1=2

(i) 'अपदो दूरगामी च' इति कस्य विषये उक्तम् ?

(ii) कमलानि कः विकासयति ?

17 (i) स्वधर्मवर्तितं किम् ? 1+1=2

(ii) पिता कस्मात् उच्चतरः ?

18 शरीरायासजननं कर्म व्यायाम उच्यते । 1+1=2

लाघवं कर्मसामर्थ्यं दीप्ताग्नेर्मेदसः क्षयः ॥

(i) किं कर्म व्यायाम उच्यते ?

(ii) दीप्ताग्निः केन भवति ?

19 "अत्र सीते त्वया दृष्टा तापसी ब्रह्मचारिणी ।" 1+1=2

(i) कः कां वदति ?

(ii) अत्र सीतया का दृष्टा आसीत् ?

20 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1×3=3

ध्यानं हित्वा बहिरेहित्वं त्यज तव कुसुमं त्यज धूपम् ।

पश्यं स्तिष्ठ स्वेदजलार्द्रस्तान्निकटे कार्यक्षेत्रे ॥

(i) कविः किं त्यक्तुं कथयति ?

(ii) कविः जनं केन रूपेण स्थातुं कथयति ?

(iii) जनः कुत्र तिष्ठेत् ?

21 अधोलिखितश्लोकस्य अन्वये रिक्तस्थानपूर्तिं कुरुत – 1×3=3

यातयामं गतरसं पूतिपर्युषितंच यत् ।

उच्छिष्टमपिचामेध्यं भोजनं तामसप्रियम् ॥

अन्वयः –

यातयामम्, ___(i)___, पूतिपर्युषितम्, उच्छिष्टम् अपि च ___(ii)___ भोजनम् ___(iii)___ ।

22 रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1+1=2

(i) दौवारिकः प्रभुवर्यस्य आदेशं पालयति ।

(ii) त्वया सत्यमभिहितम् ।

**23** कः कं प्रति कथयति ? **1+1=2**

(i) आर्य, त्वर्यतां, अस्मद्रथं तत्रैवनयतु ।

(ii) मनः शीघ्रतरं वातात् ।

**24** रिक्तस्थानपूर्तिं कुरुत – **1+1=2**

(i) सत्यवानबलः ____________ सबलात् सत्यवर्जितात् ।

(ii) ____________ गुरुतरा भूमेः ।

**25** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – **1×3=3**

निर्ममो नित्ससत्त्वस्थो मिताशी सुस्मिताननः ।
सुकत्तत्रः शिशुप्रेमी पितेवाश्रमवासिनाम् ॥

(i) अत्र कस्य आश्रमस्य चर्चा अस्ति ?

(ii) तत्र आश्रमवासिनां पिताइव कः आसीत् ?

(iii) तस्य महात्मनः कृते प्रयुक्तं विशेषणद्वयम् लिखत ।

**26** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – **1×3=3**

ईसावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुंजीथाः मा गृधः कस्यस्विद्धनम् ॥

(i) इदं जगत् सर्वं केन व्याप्तम् अस्ति ?

(ii) वस्तूनाम उपयोगः कथं कर्त्तव्यः ?

(iii) कस्यचिद् अन्यस्यधनं प्रति कीदृशः भावः भवेत् ?

**27** कस्यचिदेकस्य पाठस्य सारांशं पंचवाक्येषु संस्कृतेन लिखत – **1×5=5**

कर्तव्यनिष्ठा

**अथवा**

त्याज्यं न धैर्यम्

## खण्ड – ख
## (अनुप्रयुक्त व्याकरणम्)

28 अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखतः – $\frac{1}{2}\times 4=2$

ह, य, ष, त ।

29 रेखांकितपदेषु सन्धिच्छेदं कृत्वा संधिनाम लिखतः – 1×3=3

सर्वेन्द्रियाणि संयम्य । बह्वाशी स्वल्पसंतुष्टः ।

प्रभुभक्तश्च शूरश्च ।

30 संधिं कुरुत – 1+1=2

तत् + श्रुत्वा । उच्चैः + निश्वस्य ।

31 रेखांकितपदेषु कः मूलशब्दः काच विभक्तिः ? 1×2=2

(i) भार्या गृहे मित्रम् ।

(ii) त्वया सह यथोचितं व्यवहरिष्यति दुर्गाध्यक्षः ।

32 रिक्तस्थानेषु अंकानां स्थाने संख्यावाचकपदानि लिखतः – 1×3=3

(i) शरीरे ___(5)___ कर्मेन्द्रियाणि सन्ति ।

(ii) ___(1)___ ग्रामे बहुमत्स्यः ह्रदः आसीत् ।

(iii) ___(2)___ मत्स्यौ वसतः ।

33 रेखांकितपदयोः कः धातुः कश्चलकारः ? 1+1=2

(i) अहं मनोयोगेन पठिष्यामि ।

(ii) प्राणादयः प्रजापतिम् एत्य अपृच्छन् ।

34 रेखांकित शब्दयोः उपसर्ग–प्रत्ययौ चित्वा पृथक् लिखतः – 1+1=2

(i) क्रोधः सुदुर्जयः शत्रुः ।

(ii) असाधुः निर्दयः स्मृतः ।

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखतः – 1+1=2

गुणाश्रितः । नीलकमलम् ।

36 अधोलिखितविग्रहाणां कृते समस्तपदं लिखत – 1+1=2

(i) कृष्णः च असौ सर्पः ।

(ii) खड्गः पाणौ यस्यसः ।

37 रिक्तस्थानेषु किं पदं भविष्यति ? 1+1=2

(i) अपात्रेभ्यः __________ दानं व्यर्थं भवति । (दा + क्त)

(ii) ग्रामे __________ वहति । (नद + ङीप्)

38 कोष्ठगतशब्दस्य उपयुक्तरूपेण रिक्तस्थानानि पूरयत – 1×3=3

(i) __________ तुल्यः निधिः नास्ति । (दान)

(ii) __________ सर्वतः गृहाणिसंति । (नगर)

(iii) __________ नमः । (गुरु)

## खण्ड – ग

## (रचनाकौशलम्)

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नान् उत्तरत – 1×5=5

जन्मनः पञ्चमे सप्तमे वा वर्षे प्रायः विद्यारम्भः क्रियते । ततः चतुर्दश–षोडशना वर्ष पर्यन्तं विद्याध्ययनं क्रियते । इयम् अवधिः छात्रजीवनं कथ्यते । इयं कालावधिः अस्माकं भाविजीवनस्य आधारशिलात्वेन विद्यते । छात्रजीवने सर्वेः पूर्णनिष्ठया विद्याध्ययनं ज्ञानार्जनं च कार्यम् येन सुयोग्यतां प्राप्य जीवनयात्रायां सर्वे उन्नतिशालिनः सुखिनश्च भवेयुः । छात्रजीवने परिश्रमेण एव विद्यार्जनं भवति । अत एव कथ्यते विद्यार्थिनः कुतः सुखम् ।

**प्रश्नाः –**

(i) विद्यारंभः कदा क्रियते ?

(ii) विद्याध्ययनस्य अवधिः का ?

(iii) भाविजीवनस्य आधारशिला का ?

(iv) 'अस्माकम्' इति पदस्य मूलशब्दः कः ?

(v) विद्यार्थिनः किं न लभन्ते ?

40 अधोलिखित विषयमधिकृत्य मञ्जूषापदसहायतया एकम् अनुच्छेदं लिखत – 1×5=5

अस्माकं देशः

| मञ्जूषा |
|---|
| भारतम्, वयं, नागरिकाः, अस्य, भारते, राज्याः अनेकभाषा भाषिणः, विविध संस्कृतिवन्तः, अनेकपर्वोत्सवाः, मन्यन्ते, अनेका नद्यः, पर्वताः सुंदरं, जलवायुः |

**41** भवान् प्रमोदः, भवतां मित्रं विजयः अखिलभारतीय संस्कृत नाटक प्रतियोगितायां प्रथम पुरस्कारं लब्धवान् तदर्थं तं प्रति मंजूषायां, प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा शुभकामना पत्रं लिखतु । **1×5=5**

मुम्बइतः

तिथि :______

प्रिय मित्र विजय,

सस्नेह नमस्ते ।

श्रुतम् मया यत् ________ अखिलभारतीय नाटक प्रतियोगितायां प्रथम पुरस्कारं ________ इति महतः ________ विषयः तदर्थम् अस्माकं शुभकामनाः ________ । भविष्ये अपि एवमेव अभिनयकार्यक्रमेषु ________ स्थानं प्राप्नुयात् इति कामये ।

| मंजूषा |
|---|
| लब्धवान्, भवान्, स्वीकरोतु, प्रमोदस्य, उत्तमं । |

**42** अधोलिखितं चित्रं दृष्ट्वा मंजूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत – **1×5=5**



| मञ्जूषा |
|---|
| षड्ऋतवः, तेषु, ऋतुराजः, वसन्तः, प्रधानः सर्वोत्तमः, सुखकरः, हितकरः च, अयं ऋतुः, काम देवस्य मित्रं, मन्यते, जनाः, पशु पक्षिणः भवंति, प्रमुदिताः, नवपल्लवानि, पुष्पाणि, पादपेषु, प्रकृतौ, नवचेतना, मनोरमः, ऋतुः । |